# संस्कृत अभ्यासपत्र

कक्षा-७

## (१) प्रश्नानाम् उत्तरं लिखत ।

(क) कस्य मोहः नष्टः भवति ?

(ख) युद्धं कर्तुं कः न इच्छति ?

(ग) कस्य ज्ञानेन सर्वं विज्ञातं भवति ?

(घ) श्वेतकेतुः स्वभावेन कीदृशः आसीत् ?

(ङ) श्वेतकतुः कस्य पुत्रः आसीत् ?

(च) वटवृक्षः कुत्र आसीत् ?

(छ) वटवृक्षस्य कोटरे कः आसीत् ?

(ज) मषकः कुत्र निवसति स्म ?

(झ) मूषकः कथं जालं कर्तयति स्म ?

(ञ) शृगालः ब्राह्मणं किम् अकथयत् ?

## (२) श्लोकं पूर्णं कुरुत ।

नैनं छिन्दन्ति ______________________________ ।

न चैनं क्लेदयन्त्यापो ________________________ मारुतः ।

## (३) अधोलिखितैःशब्दैःसंस्कृतभाषायां वाक्यनिर्माणं कुरुत।

करुणापरः, कीर्तिः, कपोतः, शरणागतः, दानवीरः ।

## (४) संस्कृतभाषायां भाषान्तरं कुरुत ।

(क) उनकी कीर्ति सुनकर इन्द्र उनके पास गये।

(ख) राजन् इस कबुतर को छोड दो।

(ग) प्राचीनकाल में एक दयालु राजा थे।

(घ) इन्द्र ने स्वयं बाज बनकर राजा से कहा।

(ङ) उनका नाम शिवि था।

## (५) अमरकोशपाठानुसारेणअर्थ लिखत।

(क) पर्वतः

(ख) शिखरम्

(ग) गिरिः

(घ) अचलः

(ङ) शैलः

## (६) कस्य वचनम् इति निर्दिशत। - ५

(ख) किन्तु किम् एषः विश्वसनीयः ?

(ग) त्वां कामपि हानिं न प्रापयिष्यामि।

(घ) अद्य प्रभृति त्वं मम मित्रम्।

(ङ) त्वां जाले पतितं दृष्ट्वा अहम् अतीव दुःखितः।

## (७) रिक्तस्थानं पूरयत।

(क) अध्ययनार्थं तस्य -------- एव नासीत्।

(ख) उद्दालकः श्वेतकेतोः ज्ञानपिपासां दृष्ट्वा अतीव ------ अभवत्।

(ग) आत्मज्ञानलाभाय, -------ज्ञानलाभाय च तस्य श्रद्धा जागरिता अभवत्।

(घ) श्वेतकेतुः ------ आनयत् अकथयत् च "एतदस्ति वटफलं पितृदेव !"

(ङ) फलस्य एकं ------ भिन्नं कर्तुम् आदिशत्।

## (८) पदमेलन कुरुत।

| (क) | (ख) |
|---|---|
| दृष्ट्वेमम् | दहति |
| वासांसि | कृतनिश्चय |
| पावकः | नष्टः |
| युद्धाय | जीर्णानि |
| मोहः | स्वजनम् |